# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-१ ( Sem_2 )** **प्रश्नपत्र-६** **गुणाः - ७०**

**विषयः - धर्मशास्त्रम्** CC 1.2.4 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः** - 23/04/2016 **सन्दर्भग्रन्थः - मनुस्मृतिः - अध्याय - ३-४**

---

**विभागः - १**

**प्रश्न-१ अधस्तनेषु कयोरपि द्वयोः श्लोकयोः सन्दर्भप्रसङ्गपूर्वकं भावार्थो लेख्यः। ०८**

१. गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि। उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्॥

२. नो द्वहेत्कपिलां कन्यां नाधिलाङ्गीं नारोगिणीम्। ना लोमिमां नातिलोमां न वाचायं न पिङ्गलम्॥

३. सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि। कामतस्तु प्रवृत्तामिमाः स्युः क्रमशोऽवराः॥

**प्रश्न-२ प्रदत्तप्रश्नयोर्मध्ये कस्यापेकस्योत्तरं लिखत। ०८**

१. तृतीयाध्यायस्य विषयवस्तु लिखत।

२. चतुर्णामपि वर्णानां अष्टप्रकारकाः विवाहाः विवेचनीयाः।

**प्रश्न-३ प्रदत्तविषयेषु द्वयोः वचनं कृत्वा टिप्पणीं लिखत। ०६**

१. ब्राह्मीपुत्रः श्रेष्ठः।

२. युग्मासु पुत्रा जायन्ते।

३. कन्यायाः पिता शुल्कम् न गृह्णीयात्।

४. गृहस्थोऽपि ब्रह्मचार्येव भवति।

**प्रश्न-४ त्रयाणां प्रश्नानां लघूत्तराणि देयानि। ०३**

१. ऋतुकालिकास्त्रीणां रात्रयः कति स्मृताः?

२. अयुग्मासु रात्रिषु मेलनेन किं भवति?

३. ब्राह्मणस्य कदा शुद्धिः न भवति?

४. पुत्रीकाधर्मः इति किम्?

५. दार-शब्दस्य कोऽर्थः?

**विभागः - २**

**प्रश्न-५ अधस्तनेषु द्वयोः ससन्दर्भं भावार्थं लिखत। ०८**

१. अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥

२. अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टि वर्वृष्टेरन्नं ततः प्रजाः॥

३. विद्या तपः समृद्धेषु हुतं विप्रमुखाग्निषु। निस्तारयति दुर्गाच्च महतश्चैव किल्विषात्॥

**प्रश्न-६ कस्याप्येकस्य प्रश्नस्योत्तरं लिखत। ०८**

१. अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् - यथाग्रन्थं चर्चयत।

२. दैवपितृकर्माणि ब्राह्मणभोजनं यथाग्रन्थं लिखत।

**प्रश्न-७ प्रदत्तप्रश्नेषु चतुर्णां लघूत्तराणि लिखत । ०४**

१. श्राद्धभोजिविप्राः के?

२. पङ्क्तिपावनाः के?

३. के पितृगणाः स्मृताः?

४. सोमपाः केषां पितरः स्मृताः?

५. द्विजातीनां कृते देवकार्यात् किं विशिष्यते?

६. स्वधादेवी केषां भार्या अस्ति?

## विभागः - ३

**प्रश्न-८ प्रदत्तश्लोकेषु द्वयोः व्याख्या कार्या । ०८**

१. सन्तोषं परमास्थाय सुखार्थी सञ्यतो भवेत् । संतोषमूलं हि सुखं दुःखमूलं विपर्ययः ॥

२. ब्राह्ममुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् । कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ॥

३. सत्यं ब्रूयात् प्रियं ब्रूयन्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ॥

**प्रश्न-९ प्रदत्तयोः प्रश्नयोरमध्ये कमपि एकं साधयेत् । ०८**

१. सदाचारमहत्त्वं मनुप्रतिपादितदिशा लिखत ।

२. धर्मसेवनं सततं कुर्याद् दुःखाभिभूतः सन् मनो अधर्मे न निवेशयेत्? किमर्थम्? चर्चयत ।

**प्रश्न-१० अधोलिखितेषु द्वयोः टिप्पणी कार्या । ०६**

१. कृतं भोक्तव्यम् ।

२. ज्येष्ठानां श्रेष्ठानाम् अनुशरणं कर्तव्यम् ।

३. दानमेकं कलौ युगे ।

**प्रश्न-११ प्रदत्तेषु प्रश्नेषु त्रयाणां लघूत्तरं देयम् । ०३**

१. शनैः शनैः किं कर्तव्यम्? येन कल्याणं भवेत्?

२. परलोकमार्गे कः सहायको भवति?

३. अर्थाः कुत्र नियताः सन्ति?

४. एकाकी नित्यं किं चिन्तयेत्?

५. एकः प्रजायते एक एव प्रलीयते कः?